# संस्कृतवार्ता:

दिनाङ्क :-29.07.2025

प्रात: - 06:55

<u>लोकसभा-ऑपरेशन सिन्दूर</u>

'ऑपरेशन सिन्दूर' इति भारतीय-सैन्याभियानविषये गतदिने लोकसभायां विशिष्टा चर्चा संजाता। पहलगामस्थले आतङ्क्याक्रमणस्य प्रत्युत्तरे भारतस्य सशक्तं, सफलं, निर्णायकञ्च अभियानं 'ऑपरेशन सिन्दूर' इति। चर्चाया: प्रारम्भे रक्षामन्त्री राजनाथसिंह: प्रोक्तवान् यत् भारतीयशासनेन पाकिस्तनाय स्पष्ट: सुदृढश्च सन्देश: प्रेषित: यत् आतङ्केन सह चर्चा नैव सम्भवा। श्रीराजनाथसिंह: प्रतिपादितवान् यत् भारतस्य आतङ्कं विरुध्य प्रतिक्रिया स्पष्टा आसीत्, पाकिस्तानस्थे आतङ्कसंरचनां विरुध्य च आसीत्। श्रीसिंह: प्रोक्तवान् यत् पाकिस्तानस्य सैन्यबलेन 'आईएसआई' इति समवायेन च आतङ्कवादस्य प्रयोग: छद्मरूपेण आचर्यते।

चर्चामध्ये विदेशमन्त्री डॉ. सब्रह्मण्यमजयशंकर: प्रतिपादितवान् यत् शासनेन पहलगाम-आक्रमणमालक्ष्य वैश्विकत्वविषये एष: पदक्षेप: उत्थापिता:, अथ पाकिस्तानस्य सीमपरस्य आतङ्कवादस्य दीर्घकालेन प्रयोगं अन्ताराष्ट्रियसमुदायस्य कृते प्रयास: कृत:।

कांग्रेसदलस्य नेता गौरव: गोगोई: जम्मूकश्मीरे सुरक्षाव्यवस्थाविषये शासनं आलोचयन् प्रोक्तवान् यत् शासनं पहलगाम-आतंकिनां निगडने अभिज्ञाने च पूर्णरूपेण असमर्थम् जातम्।

<u>सर्वोच्च-न्यायालय-बिहारप्रदेश:</u>

सर्वोच्च-न्यायालयेन बिहारप्रदेशे निर्वाचनायोगाय विशेष-गहन-पुनरीक्षणस्य अधिसूचनाप्रकाशनविषये आदेशप्रदानाय निराकृतम्। न्यायमूर्ति: सूर्यकान्त:, न्यायमूर्ति: जॉयमाल्या बागची इत्युभयो: पीठेन विस्तृतं वादश्रवणं नैव कृतम्। पीठेन याचिकाकर्तृभ्य: आश्वासनं दत्तम् यत् प्रकरणे पूर्णरूपेण न्यायं सुनिश्चितं स्यात्।

<u>राष्ट्रिय-शिक्षा-नीति:</u>

राष्ट्रिय-शिक्षा-नीति: विंशति: विंशति: इत्येतस्य अद्य पञ्चवर्षाणि पूरितानि। नवशिक्षानीतिद्वारा भारतस्य विद्यालयेषु एतादृशाणि परिवर्तनानि सुनिश्चीकृतानि, यत् साम्प्रतं शिक्षा केवलं पाठ्यपुस्तक-स्मृतिपरं च नैव सीमितं स्थान्। अस्माकं सम्वाददाता प्रोक्तवान् यत् विगतेषु पञ्चवर्षेषु नवशिक्षानीतिद्वारा समावेशिता, शिक्षार्थी-केन्द्रिता च शिक्षा सुनिश्चीकृता।

भारतीय ऋतुविज्ञान-विभाग:

भारतीय ऋतुविज्ञान-विभागेन अद्य गुजरात-पूर्वीराजस्थान-पश्चिमीमध्यप्रदेशे अतिवृष्टे: रक्तवर्णिकासंचेतना प्रकाशिता। विभागेन अद्य राजस्थानस्य पूर्वी-दक्षिणी-जनपदेषु जलप्लवनसदृशी संचेतना प्रकटिता। अस्माकं सम्वाददाता नैकेषु भागेषु अतिवृष्टिकारणेन जनजीवनं दुष्प्रभावितम्।

महिला-विश्व-चषक-प्रतिस्पर्धा

महिला-विश्व-चषक-प्रतिस्पर्धायां जॉर्जियाया: बटुमी इत्यत्र दिव्यादेशमुख: इत्येषा 'कोनेरू हम्पी' इत्येतां पराभूय फिडे-विश्व-चषक-विजेतृरूपेण प्रथमा भारतीया क्रीडिका जाता। राष्ट्रपतिपदासीना द्रौपदीमुर्मु:, प्रधानमन्त्री नरेन्द्रमोदी च उभाभ्यां स्वीयवर्धापनानि प्रकटितवन्तौ।